ജില്ലാ പഞ്ചായത്ത്, കോഴിക്കോട്
District Panchayath, Kozhikode




# സജ്ജം 2026

# SAJJAM-2026

## പത്താം തരം പഠന പിന്തുണ പരിപാടി 2026

## SANSKRIT

ജില്ലാ വിദ്യാഭ്യാസ പരിശീലന കേന്ദ്രം (ഡയറ്റ്)
കോഴിക്കോട്


(കടപ്പാട് : വയനാട് , കാസറഗോഡ്, ആലപ്പുഴ ഡയറ്റുകൾ)



നമ്മുടെ പൊതു വിദ്യാഭ്യാസ മേഖല പൂർവാധികം കരുത്തോടെ മുന്നേറുന്നുണ്ട്. ഇതിനായി പ്രാദേശിക ഭരണകൂടങ്ങൾ വികേന്ദ്രീകൃത ആസൂത്രണ പ്രക്രിയയിലൂടെയും കൃതമായ നിർവ്വഹണത്തിലൂടെയും വലിയ പങ്കാണ് വഹിച്ചുവരുന്നത്. പൊതു പരീക്ഷകൾ അഭിമുഖീകരിക്കുന്ന കുട്ടികളുടെ പഠന പ്രവർത്തനങ്ങളുടെ വിളവെടുപ്പാണ് വാർഷിക പരീക്ഷകൾ. അതിനാൽ ഓരോ വിഷയത്തിലും അനിവാര്യമായ അറിവ് നേടി പരീക്ഷകളിൽ മികച്ച മാർക്ക് നേടാൻ എല്ലാ കുട്ടികൾക്ക് കഴിയണം. തങ്ങളുടെ ജീവിതത്തിലെ തന്നെ പ്രധാനപ്പെട്ട പരീക്ഷയായ എസ്.എസ്. എൽ.സിക്ക് വേണ്ടി തയ്യാറാവുന്ന വിദ്യാർത്ഥികളെ ആത്മവിശ്വാസത്തോടെ അതിന് പ്രാപ്തരാക്കുന്നതിനാണ് സംസ്ഥാനത്തെ വിവിധ ഡയറ്റുകളിൽ നിന്ന് സമാഹരിച്ച് പുറത്തിറക്കുന്ന ഈ ചോദ്യ ബാങ്കിലൂടെ ഉറപ്പാക്കുന്നത്. സജ്ജം – 2026 ന്റെ ഭാഗമായി നടക്കുന്ന ബ്ലോക്ക്തല സഹവാസ ക്യാമ്പുകളിലും വിദ്യാലയങ്ങളിൽ നടക്കുന്ന ദശദിന ക്യാമ്പുകളിലും ഈ പഠന സാമഗ്രി ഫലപ്രദമായി പ്രയോജനപ്പെടുത്തുമല്ലോ.

അതീവ സന്നദ്ധതയോടെ വിദ്യാലയങ്ങളിലെ പഠന പിന്തുണ പ്രവർത്തനങ്ങൾ ഏറ്റെടുക്കുന്ന അധ്യാപകരും രക്ഷിതാക്കളും ഉദ്യോഗസ്ഥരും ചേർന്ന കൂട്ടായ്മയാണ് നമ്മുടെ ജില്ലയുടെ വിദ്യാഭ്യാസ വികസനത്തിന് എന്നും താങ്ങായിട്ടുള്ളത്. ചോദ്യശേഖരങ്ങൾ അടങ്ങിയ ഈ പഠന പിന്തുണ സാമഗ്രി കുട്ടികൾക്ക് മികച്ച വിജയം കരസ്ഥമാക്കാൻ സഹായിക്കട്ടെ എന്ന് ആശംസിക്കുന്നു.

**ശ്രീമതി. മില്ലി മോഹൻ, കൊട്ടാരത്തിൽ**
പ്രസിഡണ്ട്
ജില്ലാ പഞ്ചായത്ത്
കോഴിക്കോട്.




സാങ്കേതിക മുന്നേറ്റത്തിന്റെ പുതിയ ലോകത്ത് അടിസ്ഥാന വിദ്യാഭ്യാസത്തിൻെറ അളവുകോലായി എന്നും പരിഗണിക്കുന്നത് ഹൈസ്കൂൾ തലത്തിലെ പൊതു പരീക്ഷകൾ തന്നെയാണ്. നൈപുണികൾക്ക് പ്രാധാന്യം നൽകുന്ന പുതിയ പഠന തൊഴിൽ മേഖലയിൽ അടിസ്ഥാന വിദ്യാഭ്യാസം എന്നത് സെക്കണ്ടറി തലമായി മാറിയിട്ടുണ്ടെന്നതാണ് സത്യം. അത്കൊണ്ട് തന്നെ എസ്.എസ് എൽ.സി പരീക്ഷയെന്നത് നമ്മുടെ സമൂഹത്തിൽ അത്രമേൽ പ്രാധാന്യുള്ളതാണ്.

മികച്ച വിജയം ഈ പരീക്ഷയിൽ നേടുന്നതിന് നല്ല പിന്തുണയും കൃത്യതയാർന്ന പഠനക്രമീകരണവും വേണം. അതിനു കുട്ടികളെയും രക്ഷിതാക്കളെയും അധ്യാപകരെയും സഹായിക്കുന്ന രീതിയിലാണ് ഡയറ്റ് മുഖേന സംസ്ഥാന തലത്തിൽ സമാഹരിച്ച ഈ ചോദ്യമാതൃകകളും പ്രവർത്തനങ്ങളും. കോഴിക്കോട് ജില്ലാ പഞ്ചായത്ത് സജ്ജം 2026 ലൂടെ വിദ്യാർത്ഥികളെയും അവർക്ക് പഠന പിന്തുണ നൽകുന്നവരെയും ഒരുക്കിയെടുക്കാനാണ് ഈ പഠനസാമഗ്രിവഴി ലക്ഷ്യമിടുന്നത്. എല്ലാ വിദ്യാർത്ഥികൾക്കും അവരെ ചേർത്തു നിർത്തി പിന്തുണ നൽകുന്നവർക്കും ഈ പഠനസഹായി ഉപയോഗപ്പെടുത്താനാവട്ടെ..

വിജയാശംസകൾ നേർന്നു കൊണ്ട്.

**കെ.കെ. നവാസ്**
വൈസ് പ്രസിഡണ്ട്
ജില്ലാ പഞ്ചായത്ത് കോഴിക്കോട്



കോഴിക്കോട് ജില്ലാ പഞ്ചായത്തിന്റെ നേതൃത്വത്തിൽ ജില്ലയിലെ പൊതുവിദ്യാലയങ്ങളിലെ പത്താംതരം പരീക്ഷ എഴുതുന്ന വിദ്യാർത്ഥികൾക്കായി പഠന സാമഗ്രി പുറത്തിറക്കുകയാണ്. ജില്ലാ വിദ്യാഭ്യാസ പരിശീലന കേന്ദ്രം ഡയറ്റിന്റെ നേതൃത്വത്തിൽ വിദ്യാർത്ഥികളുടെ ആത്മവിശ്വാസം വർദ്ധിപ്പിക്കുന്നതിനും സംതൃപ്തിയോടെ പൊതു പരീക്ഷയെ നേരിടുന്നതിനും പ്രാപ്തരാക്കുന്നതിന് വേണ്ടിയാണ് ഈ പഠന സാമഗ്രി തയ്യാറാക്കിയിട്ടുള്ളത് ആത്യന്തിക വിലയിരുത്തലിനെ അഭിമുഖീകരിക്കാൻ കുട്ടികളെ സഹായിക്കുന്ന ചോദ്യശേഖരങ്ങളും മാതൃകകളും ആണ് ഇതിൽ ഉൾപ്പെടുത്തിയിരിക്കുന്നത് കുട്ടികളുടെ ഭാവിയിൽ ഏറെ നിർണായകമാകുന്ന എസ്.എസ്.എൽ.സി. പരീക്ഷയിൽ മികവ് പുലർത്തുന്നതിന് കുട്ടികളെ സഹായിക്കാൻ ചെയ്യുന്ന ഓരോ ശ്രമവും വിലപ്പെട്ടതാണ്. നമ്മുടെ അധ്യാപകരും വിദ്യാഭ്യാസ വകുപ്പിലെ ഉദ്യോഗസ്ഥരും രക്ഷിതാക്കളും പൊതുസമൂഹവും എല്ലാം കുട്ടികളെ ചേർത്തു നിർത്തിക്കൊണ്ട് മികച്ച വിജയം നേടാൻ അവരെ പിന്തുണയ്ക്കേണ്ടതുണ്ട്.

സജ്ജം - 2026 എന്ന പേരിൽ ജില്ലയിലെ മുഴുവൻ വിദ്യാലയങ്ങളിലും നടക്കുന്ന ദശ ദിന ക്യാമ്പ്, ബ്ലോക്ക് തലത്തിൽ നടക്കുന്ന പ്രത്യേക സഹവാസ ക്യാമ്പ് എന്നിവയിലൂടെ മികച്ച പിന്തുണയാണ് വിദ്യാർത്ഥികൾക്കായി ലക്ഷ്യമിടുന്നത്

സംസ്ഥാനത്തെ വിവിധ ഡയറ്റുകൾ തയ്യാറാക്കിയ പഠന പിന്തുണ മെറ്റീരിയലുകൾ സമാഹരിച്ച് കോഴിക്കോട് ഡയറ്റിന്റെ നേതൃത്വത്തിൽ കുട്ടികൾക്ക് ലഭ്യമാക്കുകയാണ് ഈ പഠന സഹായി തയ്യാറാക്കുന്നതിന് നേതൃത്വം നൽകിയ വിവിധ ജില്ലകളിലെ അധ്യാപകരെയും വിദ്യാഭ്യാസ ഓഫീസർമാരെയും അഭിനന്ദിക്കുന്നു അതോടൊപ്പം ഇത് നമ്മുടെ ജില്ലയിലെ കുട്ടികൾക്ക് ഏറ്റവും ഉപകാരപ്രദമായ രീതിയിൽ പ്രയോജനപ്പെടുത്തുന്നതിന് എല്ലാ അധ്യാപകരുടെയും പിന്തുണ ഉണ്ടാവണമെന്ന് അഭ്യർത്ഥിക്കുന്നു.

**ശ്രീ. മുനീർ എരവത്ത്**
ചെയർമാൻ
വിദ്യാഭ്യാസ സ്ഥിരം സമിതി
ജില്ലാ പഞ്ചായത്ത് കോഴിക്കോട്





ജില്ലാ പഞ്ചായത്തിന്റെ നേതൃത്വത്തിൽ പൊതു വിദ്യാഭ്യാസം ശക്തിപ്പെടുത്തുന്നതിനും വിദ്യാലയങ്ങളെ മികവിന്റെ കേന്ദ്രങ്ങളാക്കി മാറ്റുന്നതിനുമുള്ള വേറിട്ട നിരവധി പ്രവർത്തനങ്ങൾ ഇതിനകം നടപ്പിലാക്കി വരുന്നുണ്ട്. ജില്ലയിലെ അക്കാദമിക പ്രവർത്തനങ്ങളെ ഏകോപിപ്പിച്ചുകൊണ്ട് ജില്ലാ വിദ്യാഭ്യാസ പരിശീലന കേന്ദ്രത്തി (ഡയറ്റ്)ന്റെ നേതൃത്വത്തിൽ ഇതിനുള്ള പിന്തുണ തദ്ദേശ സ്വയംഭരണ സ്ഥാപനങ്ങൾക്ക് നൽകിവരുന്നുമുണ്ട്. പത്താം ക്ലാസിലെ കുട്ടികളുടെ പഠനപ്രശ്നങ്ങൾ പരിഹരിക്കാനായി ജില്ലാ പഞ്ചായത്ത് നടപ്പിലാക്കിവരുന്ന എഡ്യൂകെയർ പദ്ധതിയുടെ ഭാഗമായി പരീക്ഷ എഴുതുന്ന മുഴുവൻ കുട്ടികൾക്കും പ്രയോജനം ലഭിക്കുന്ന രീതിയിലുള്ള ചോദ്യശേഖരവും അടിസ്ഥാന ആശയങ്ങളുമാണ് ഈ പഠന മെറ്റീരിയലിലൂടെ പരിചയപ്പെടുത്തുന്നത്. പാഠപുസ്തകവും വിലയിരുത്തൽ രീതിയും മാറിയ ഘട്ടത്തിൽ വിലയിരുത്തലിനെ അഭിമുഖീകരിക്കാൻ കുട്ടികളെ ഈ സാമഗ്രിയിൽ നൽകിയിരിക്കുന്ന ചോദ്യശേഖരങ്ങളും പ്രവർത്തനങ്ങളും സഹായിക്കുമെന്നുറപ്പുണ്ട്.

സമഗ്ര ഗുണമേന്മ വിദ്യാഭ്യാസ പദ്ധതിയുടെ ഭാഗമായി പൊതുവിദ്യാഭ്യാസ വകുപ്പ് നൽകിയിട്ടുള്ള മാർഗ്ഗ നിർദ്ദേശങ്ങൾ ഉൾക്കൊണ്ടാണ് സംസ്ഥാനത്തെ വിവിധ ഡയറ്റുകൾ തയ്യാറാക്കിയ ചോദ്യശേഖരങ്ങളും പഠന പിന്തുണ സാമഗ്രികളും സമാഹരിച്ച് ഇത്തരത്തിൽ ഒരു പിന്തുണ സഹായി ലഭ്യമാക്കിയിരിക്കുന്നത്. പതിവ് ഓർമ്മ ചോദ്യങ്ങളിൽ നിന്ന് വ്യത്യസ്തമായി ഉയർന്ന തലത്തിലുള്ള ചിന്താപ്രക്രിയ ഉറപ്പാക്കുന്ന ചോദ്യങ്ങളും അനുഭവാദിഷ്ഠിതവും പ്രവർത്തനാധിഷ്ഠിതവുമായ ചോദ്യങ്ങൾക്ക് ആണ് കൂടുതൽ പ്രാധാന്യം നൽകിയിട്ടുള്ളത്. മികച്ച ആത്മവിശ്വാസത്തോടെ എസ്.എസ്.എൽ.സി. പരീക്ഷയെ അഭിമുഖീകരിക്കാൻ ഈ പുസ്തകം സഹായിക്കുമെന്ന് പ്രതീക്ഷിക്കുന്നു. സംസ്ഥാനത്തെ ഏറ്റവും മികച്ച വിജയം കൈവരിക്കാൻ നമ്മുടെ ജില്ലയിലെ എല്ലാ വിദ്യാർത്ഥികൾക്കും കഴിയട്ടെ, വിജയാശംസകൾ.

**ഡോ. അബ്ദുന്നാസർ യു.കെ**
പ്രിൻസിപ്പാൾ
ഡയറ്റ് കോഴിക്കോട്

**ശ്രീ. അസീസ്. ടി**
ജില്ലാ വിദ്യാഭ്യാസ ഉപഡയറക്ടർ
കോഴിക്കോട്

**प्रथमः पाठः**

**वनराजिसम्पदः**

**१). समानार्थक पदं चित्वा लिखत।**

| | |
|---|---|
| काननम् | मयूरः, केकि |
| खगः | गुहा, कन्दरः, बिलः |
| कुसुमम् | पर्वतः, आर्द्री |
| तरुः | वनम्, आरण्यम् |
| बर्हिः | वृक्षः |
| शाखामृगः | वानरः, मर्कटः |
| दरी | पक्षी |
| महीधरः | पुष्पम्, सूनम् |

**२) प्रस्तावनाद्वयं पठित्वा अधस्तात् साधु उत्तरं चित्वा लिखत।**

क). **पर्वतं परितः वनानि सन्ति।**
**आकाशं वीक्ष्य सिंहः उच्चैः गर्जति।**

१) प्रथम वाक्यं साधु।
२) द्वीतीय वाक्यं साधु।
३) प्रथमं वाक्यं असाधु।
४) प्रथमं द्वितीयं च वाक्यं साधु।

ख). **वनसम्पदः सर्वेषाम् अत्यन्तमुपकारप्रदाः भवन्ति।**
**सस्यानां शाखासु नकुलाः शशकाः च सम्मिलन्ति।**

क) प्रथमं वाक्यं असाधु।
ख) द्वीतीय वाक्यं असाधु।
ग) प्रथमं वाक्यं साधु।
घ) प्रथमं द्वितीयं च वाक्यं साधु।

ग) **पर्वतस्य परितः वनानि सन्ति।**
**पर्वतं परितः वनानि सन्ति।**

क)　 प्रथमं वाक्यं साधु।
ख)द्वीतीय वाक्यं साधु।
ग) प्रथमं द्वितीयं च वाक्यं असाधु।
घ) प्रथमं द्वितीयं च वाक्यं साधु।

**३).　 आशयानुसारं कविता पङ्क्तीः चित्वा लिखत।**

**क). पर्वतं परितः वनानि सन्ति ।**

१) परितो महीधरं भो ! चकास्ति ॥
२) शाखामृगानां च सुखमेलनम् ।
३) नवपल्लवाढ्यं च कुसुमसम्पन्नकं
४) घनघोरसुन्दरं बन्धुरं काननम्,

**ख). आकाशं वीक्ष्य सिंहः उच्चैः गर्जति ।**

१) वनशिलातलमेत्य तारापथं वीक्ष्य मृगकुलाधीशस्य घनगर्जनम्
२) खगमृगादीनां तु सुखनिशान्तम् । ।
३) शाखामृगानां च सुखमेलनम् ।

**ग). वनसम्पदः सर्वेषां प्राणिनाम् अत्यन्तमुपकारप्रदाः भवन्ति।**

१) वनराजिसम्पदः, प्राणिनामिव मर्त्य-लोकस्य सर्वथा हितकराः स्युः
२) नवलताकुञ्जषु नित्यं वनप्रियैः कृतमहो
३) बर्हिणां नर्तनं नवमेघवर्षणम्

घ). **प्रकृतिः मनोहररूपेण सन्तोषेण वर्तते।**

१) वनशिलातलमेत्य तारापथं वीक्ष्य मृगकुलाधीशस्य घनगर्जनम्
२) प्रकृतिस्तु मोहनाकारेण भीषणे नानान्त्यरूपेण वर्ततेतत्र
३) शाखामृगानां च सुखमेलनम् ।

सुखं च तत् निशान्तं च

| | | | |
|---|---|---|---|
| ङ.) | **सस्यानां शाखासु खगाः वानराः च सम्मिलन्ति** | १) | नवपल्लवाढ्यं च कुसुमसम्पन्नकं |
| | | २) | तरुलता शाखासु नीडजानां तथा शाखामृगानां च सुखमेलनम् । |
| | | ३) | वनशिलातलमेत्य तारापथं वीक्ष्य मृगकुलाधीशस्य घनगर्जनम् |

| | | | |
|---|---|---|---|
| च) | **मयूराणां नृत्तेन नूतनमेघानां वर्षणेन कानने सर्वत्र आघोषः प्रचलति** | १) | नवलताकुञ्जषु नित्यं वनप्रियैः कृतमहो |
| | | २) | नवपल्लवाढ्यं च कुसुमसम्पन्नकं |
| | | ३) | बर्हिणां नर्तनं नवमेघवर्षणं वनतलं सर्वत्र घोषपुर्णम्। |

**कः मनोभावः इति लिखतु।**

१) विद्यालयस्य जैववैविध्यारामे अनेकानि जीवजालानि सन्ति। छात्राः तेषां परिपालनं सम्यक् कुर्वन्ति। अत्र कः मनोभावः

क) अत्याग्रहः ख) सहजीविस्नेहः

ग) स्वार्थता घ) असहिष्णुता

२) कोकिलः वल्लीनिकुञ्जेषु मधुरं गायन्ति। अत्र कः मनोभावः

क) आह्लादः ख) स्वार्थता

ग) निराशा घ) अत्याग्रहः

३) सस्यानां शाखासु खगाः वानराः च सम्मिन्ति। अत्र कः मनोभावः

क) सन्तोषः ख) निराशा
ग) स्वार्थता घ) अत्याग्रहः

**५). उदाहरणानुसारं समानसन्धियुक्तं पदं खण्डिकातः स्वीकृत्य पदच्छेदं कुरुत।**

१) विद्यालयेस्मिन् प्रकृतिसंरक्षणदिनं समुचितमाचरति। एतदाकर्ण्य सर्वे छात्राः सस्यानि आनीतवन्तः।

उदा- ग्रन्थे + अस्मिन् = ग्रन्थेस्मिन्

---------+ ---------------- = ---------------------

तत् + आरभ्य = तदारभ्य

----------+ --------------- = ----------------------

2) प्रकृतिस्तु मोहनाकारेण भीषणेनानन्त्यरूपेण वर्ततेत्र

कविस्तु - कविः + तु

---------------- - ------सुखं च तत् निशान्तं च + ----------------

घर्जनेनतिशब्देन - घर्जनेन + अतिशब्देन

----------------- - -------- + --------------

**६). उचितं विग्रहवाक्यं चित्वा लिखत।**

क) वननिर्झरी - सुखं च तत् निशान्तं च
ख) सरसीतटम् - वनात् निर्गता निर्झरी
ग) घनघर्जनम् - सरस्याः तटम्
घ) सुखनिशान्तं - घनं च तत् गर्जनं च

**७). श्लोकं पठित्वा अधोदत्तानां प्रश्नानांम् उत्तरं लिखतु।**

**घनघोरसुन्दरं बन्धुरं काननं**
**खगमृगादीनां तु सुखनिशान्तक्।**
**नवपल्लवाढ्यं च कुसुमसम्पन्नकम्**
**परितो महीधरं भोः ! चकास्ति।।**

१) श्लोकात् गृहम् इत्यर्थकं पदं चित्वा लिखत।

२)	अत्र क्रियापदं किम्

३)	श्लोकस्य आशयं स्ववाक्यैः लिखत।

**८).	वनसंरक्षणम् इति विषये लघुविवरणं लिखत।**

श्रद्धेयः अंशाः -	प्रकृतिः, सस्यसम्पन्नं काननम्, प्राणवायुः, शुद्धजलं, वनवत्करणं, वनसंरक्षणम्।

## उत्तरसूची

**समानार्थक पदं चित्वा लिखत।**

| | | |
|---|---|---|
| १. कानननम् | - | वनम्, आरण्यम् |
| २. खगः | - | पक्षी |
| ३. कुसुमम् | - | पुष्पम्, सूनम् |
| ४. तरुः | - | वृक्षः |
| ५. बर्हिः | - | मयूरः, केकि |
| ६. शाखामृगः | - | वानरः, मर्कटः |
| ७. दरी | - | गुहा, कन्दरः, बिलः |
| ८. महीधरः | - | पर्वतः, आर्द्री |

**प्रस्तावनाद्वयं पठित्वा अधस्तात् साधु उत्तरं चित्वा लिखत।**

क) प्रथमं द्वितीयं च वाक्यं साधु।

ख) प्रथमं वाक्यं साधु।

ग) द्वीतीय वाक्यं साधु।

**३). आशयानुसारं कविता पङ्क्तीः चित्वा लिखत।**

क) घनघोरसुन्दरं बन्धुरं कानननम्,

ख) वनशिलातलमेत्य तारापथं वीक्ष्य मृगकुलाधीशस्य घनगर्जनम्

ग) वनराजिसम्पदः, प्राणिनामिव मर्त्य-लोकस्य सर्वथा हितकराः स्युः

घ) प्रकृतिस्तु मोहनाकारेण भीषणे नानान्त्यरूपेण वर्ततेतत्र

ङ) तरुलता शाखासु नीडजानां तथा शाखामृगानां सुखमेलनम् ।

च) बर्हिणां नर्तनं नवमेघवर्षणं वनतलं सर्वत्र घोषपुर्णम्।

**कः मनोभावः इति लिखतु।**

१) सहजीविस्नेहः

२) आह्लादः

३) सन्तोषः

**६). उचितं विग्रहवाक्यं चित्वा लिखत।**

क) वनात् निर्गता निर्झरी

ख) सरस्याः तटम्

ग) घनं च तत् गर्जनं च

घ) सुखं च तत् निशान्तं च

## द्वितीयः पाठः
## क्षितिरार्द्रा भवेत् सदा

**शतृशानचन्तौ चित्वा लिखत।**

उदा - जनसमूहः प्रकृतिदुरन्तं पश्यन् कम्पमानः अभवत् ।

शतृ - पश्यन् ।  शानच् - कम्पमानः ।

१. मुख्यसचिवः शुभम् आशंसमानः प्रभाषणं कुर्वन् अस्ति ।

२. युवजनोत्सवे विजयम् इच्छन् छात्रः नितरां यतमानः  अवर्तत ।

३. सः गीतं शृण्वन् पचमानः अस्ति ।

४. भूस्खलनेन प्रातिवेशिकस्य भवनं भग्नं पश्यन् बालः  तपमानः अवर्तत ।

५. शिष्यं पाठयन् अध्यापकः मोदमानः अवर्तत ।

६.अविद्यायां वर्तमानः नरः स्वयं पण्डितः इति विचिन्तयन् भवति ।

शत्रन्तम् - ..........................................

शानजन्तम् - ..........................................

७. विद्यालये वर्तमानः छात्रः सम्यक् पठन् परीक्षां लिखति

शत्रन्तम् - ..........................................

शानजन्तम् - ..........................................

| **शत्रन्तम् ।** | **शानजन्तम् ।** |
|---|---|
| पश्यन् । | कम्पमानः । |
| कुर्वन्। | आशंसमानः। |
| इच्छन् । | यतमानः। |
| शृण्वन् । | पचमानः । |
| पश्यन् । | तपमानः। |
| पाठयन् । | मोदमानः |

**कोष्टकात् अनुचितं गणं चित्वा लिखत।**

१. कालिन्दी - कलिन्दजा, बलदेवः - हलायुधः, सीर – हलम् , क्षितिः - कुल्या।

२. क्षितिः - वसुन्धरा , दशा - अवस्था, वत्सः - गोशाबकः, बलदेवः - उपत्यका।

३. वत्सः - गोशाबकः,दशा - अवस्था, सानुः - उपत्यका, कालिन्दी - वत्सः।

**उदाहरणानुसारं वाक्यानि परिवर्त्य लिखत।**

उद्याने पाटलस्य ऋते सर्वाणि पुष्पाणि सन्ति ।

उद्याने पाटलात् ऋते सर्वाणि पुष्पाणि सन्ति ।

१. वाटिकायां रामः ऋते सर्वे सन्ति ।

२. गृहे बालकः ऋते सर्वे सन्ति ।

३. ग्रामे पटोलेन ऋते सर्वम् आनीतम् ।

४. विद्यालये रघुवंशः ऋते अन्यत् सर्वमस्ति ।

५, ग्रन्थालये कुमारसम्भवः ऋते अन्यत् सर्वमस्ति ।

६. कक्ष्यायां रहीमः नास्ति । अन्ये सर्वे सन्ति ।

७. भोजनाय तक्रं नास्ति । अन्यत् सर्वम् अस्ति ।

८. आपणे तण्डुलं नास्ति । अन्यत् सर्वम् अस्ति ।

**उदाहरणानुसारं क्तावानात- ल्यबन्त-तुमुन्नन्त रूपाणि  लिखत।**

१. गणेशः व्यायामं करोति। आरोग्यं संरक्षयति।

उदा - गणेशः व्यायामं **कृत्वा** आरोग्यं संरक्षयति।

२. बालकः विद्यालयं गच्छति। पाठं पठति।

३. माता गानं श्रृणोति। भोजनं निर्माति।

४. वनिता मातरं पश्यति। पात्रं ददाति।

५. राधा वाहनं नयति। विद्यालयं गच्छति।

६. चित्रा नृत्तं करोति। दूरदर्शनं पश्यति।

७. मातुलः चलचित्रं पश्यति। भोजनं करोति।

| **क्तान्तम्** | **ल्यबन्तम्** | **तुमुन्नन्तम्** |
|---|---|---|
| पठित्वा<br>लिखित्वा<br>ज्ञात्वा<br>गत्वा<br>उषित्वा<br>पृष्ट्वा | प्रक्षाल्य<br>उपेक्ष्य<br>प्राप्य<br>अवलोक्य<br>अनुसृत्य<br>उपविश्य | पठितुम्<br>वक्तुम्<br>ज्ञातुम्<br>प्रष्टुम्<br>लिखितुम्<br>उपवेष्टुम् |

| | | |
|---|---|---|
| हसित्वा | आगत्य | हसितुम् |
| उक्त्वा | विलोक्य | स्नातुम् |
| स्नात्वा | विस्मृत्य | कर्तुम् |
| कृत्वा | अनुगम्य | प्रक्षालयितुम् |
| नीत्वा | नमस्कृत्य | नेतुम् |
| स्मृत्वा | परिष्कृत्य | स्मर्तुम् |

## उत्तरसूची

| | |
|---|---|
| शतृ | शानच् |
| कुर्वन् | आशंसमानः |
| इच्छन् | यतमानः |
| शृण्वन् | पचमानः |
| पश्यन् | तपमानः |
| पाठयन् | मोदमानः |
| विचिन्तयन् | वर्तमानः |
| पठन् | वर्तमानः |

**कोष्टकात् अनुचितं गणं चित्वा लिखत।**

१. क्षितिः - कुल्या

२. बलदेवः - उपत्यका

३. कालिन्दी - वत्सः

उदाहरणानुसारं वाक्यानि परिवर्त्य लिखत।

१. बालात्

२. पटोलात्

३. रघुवंशात्

४. कुमारसम्भवात्

५. रहीमात्

६. तक्रात्

७. तण्डुलात्

**उदाहरणानुसारं क्तावानात- ल्यबन्त-तुमुन्नन्त रूपाणि  लिखत।।**

१. गत्वा

२. श्रुत्वा

३. दृष्टा

४. नीत्वा

५. कृत्वा

६. दृष्ट्वा

## तृतीयः पाठः
## केरलारामः

**कोष्टकात् उचितम् उत्तरं चित्वा लिखत।**

१) होर्त्तूस् मलबारिक्कस् इति लाट्टिन् पदस्य अर्थः कः
(मलबार् प्रदेशस्य उद्यानम्, तिरुवितामकूर् प्रदेशः, मलबार् ग्रामः)

२) होर्त्तूस् मलबारिक्कस् इति ग्रथः कस्य इच्छाशक्तेः सफलं भवति।
(हेन्ट्रिक् वान् रीट् ,तोमस् अल्वा एटिसण्, इट्टि अच्युतन्)

३) ग्रन्थरचनायै साहाय्यं प्रदत्तेषु प्रमुखः केरलपण्डितः कः
(रामपुरत्तु वारियर्, इट्टि अच्युतन्, कृष्णपिल्ला)

४) कोल्लोट्ट् वैद्यः इति प्रख्यातः कः
(चङ्ङम्पुषा, वेण्मणि नम्पूतिरि, इट्टि अच्युतन्)

५) कोल्लोट्ट् वैद्यकुटुम्बस्य पारम्पर्यसस्यविज्ञानग्रन्थस्य नाम किम्
(चोल् केट्ट् पुस्तकम्, पञ्चतन्त्रम्, ऐतिह्यमाला)

६) होर्त्तूस् मलबारिक्कूस् नाम ग्रन्थे कस्य वृक्षस्य विवरणं प्रथमतया वर्णितम्।
(कल्पवृक्षस्य, कर्णिकारवृक्षस्य, आम्रवृक्षस्य)

७) प्रथमतया मलयाललिपिः कस्मिन् ग्रन्थे मुद्रिता अभवत्।
(होर्त्तूस् मलबारिक्कस् इति ग्रन्थे, ऐतिह्यमालायाम् , महाभारते)

८) कस्य आदरसूचनार्थं अञ्जलिवृक्षस्य वंशे समुत्पन्नस्य नूतनसस्यस्य अच्युदेमिया इति नामधेयं कृतम्
(इट्टि अच्युतन्, वेण्मणि नम्पूतिरि, कुञ्किकुचट्टन् तम्पुरान्)

**विग्रहवाक्यानि लिखत।**

| | | |
|---|---|---|
| वनौकेभ्यः | - | प्रकर्षेण ख्यातः प्रख्यातः, तस्य |
| शास्त्रान्तरेषु | - | चित्रेण सह वर्तते। |
| सचित्रम् | - | विशिष्टं ज्ञानम्। |
| प्रख्यातस्य | - | अन्यत् शास्त्रं शास्त्रान्तरेषु। |
| विज्ञानम् | - | वनम् ओकः योषां ते वनौकसः तेभ्यः |
| ग्रन्थतल्लजः | - | प्रशस्तः ग्रन्थः। |

**पदच्छेदः**

| | | |
|---|---|---|
| ग्रन्थः एव | - | ग्रन्थे +एव |
| कल्पवृक्ष इति | - | कल्पवृक्षः + इति |
| ग्रन्थेस्मिन् | - | ग्रन्थे + अस्मिन् |
| विवरणञ्च | - | विवरणं + च |
| प्रमुखोस्ति | - | प्रमुखः + अस्ति |

**यथोचितं योजयत**

| | | |
|---|---|---|
| इट्टि अच्युतन् | - | डच् देशीयः |
| कृष्णमरीचम् | - | आमलकी |
| द्रव्यगृणसंग्रहः | - | वैद्यशास्त्रकोशः |
| ऊर्जप्रदायिनी | - | यवनप्रियम् |
| हेन्ट्रिक् वान्रीट् | - | कोल्लाट् वैद्यन् |

**सस्यानाम् औषधगुणान् लिखतु।**

| | | |
|---|---|---|
| निम्बः | - | स्मृतिवर्धकः |
| आमलकी | - | ऊर्जप्रदायिनी |
| तुलसी | - | स्मृतिवर्धकः |
| हरिद्रा | - | रोगगुणनाशिनी |
| अशोकः | - | रक्तशोधकः |
| कर्णिकारः | - | विषहारिणी |
| ईश्वरमूली | - | व्रणनाशकः |
| ब्रह्मी | - | वातहारीणि |

**प्रस्तावना द्वयं पठत। अधस्तात् साधु उत्तरं किमिति लिखत।**

१) होर्त्तूस् मलबारिक्कूस् नामके ग्रन्थे मलबार् प्रदेशेषु विद्यमानानां वैशिष्ट्यं प्रदिपादयति। कोल्लाट्ट् वैद्यकुटुम्बस्य पारम्पर्य सस्य विज्ञानं समस्तं चोल्केट्ट् पुस्तके आसीत्।

१) प्रथमं वाक्यं साधु। २) द्वितीयं वाक्यं साधु। ३) प्रथमं द्वितीयं साधु।

४) प्रथमं द्वितीयं असाधु।

२) होर्तूस् मलबारिक्कूस् ग्रन्थे नालिकेरवृक्षस्य गुणस्वरूपादीनि प्रथमतया वर्णितम्। अञ्जलिवृक्षस्य वंशे समुत्पन्नस्य नूतनसस्यस्य अच्युदेमिया इति नामधेयं कृतम्

१) प्रथमं वाक्यं साधु।
२) द्वितीयं वाक्यं साधु।
३) प्रथमं द्वितीयं साधु।
४) प्रथमं द्वितीयं असाधु।

३) हेन्ड्रिक् वान् रीट् जर्मन् देशीयः अस्ति। होर्तूस् मलबारिक्कुस् ग्रन्थे कलासाहित्यस्य विवरणं द्त्तमास्ति।

१) प्रथमं वाक्यं साधु।
२) द्वितीयं वाक्यं साधु।
३) प्रथमं द्वितीयं साधु।
४) प्रथमं द्वितीयं असाधु।

# उत्तरसूची

**कोष्टकात् उचितम् उत्तरं चित्वा लिखत।**

मलबार् प्रदेशस्य उद्यानम्,

हेन्ट्रिक् वान् रीट्

इट्टि अच्युतन्,

इट्टि अच्युतन्

चोल् केट्ट् पुस्तकम्

कल्पवृक्षस्य

होर्त्तूस् मलबारिक्कस्  इति ग्रन्थे

इट्टि अच्युतन्

## विग्रहवाक्यानि लिखत।

| | | |
|---|---|---|
| वनौकेभ्यः | - | वनम् ओकः योषां ते वनौकसः तेभ्यः |
| शास्त्रान्तरेषु | - | अन्यत् शास्त्रं शास्त्रान्तरेषु। |
| सचित्रम् | - | चित्रेण सह वर्तते। |
| प्रख्यातस्य | - | प्रकर्षेण ख्यातः प्रख्यातः, तस्य |
| विज्ञानम् | - | विशिष्टं ज्ञानम्। |
| ग्रन्थतल्लजः | - | प्रशस्तः ग्रन्थः। |

| | | |
|---|---|---|
| इट्टि अच्युतन् | - | डच् देशीयः |
| कृष्णमरीचम् | - | आमलकी |
| द्रव्यगुणसंग्रहः | - | वैद्यशास्त्रकोशः |
| ऊर्जप्रदायिनी | - | यवनप्रियम् |
| हेन्ट्रिक् वान्रीट् | - | कोल्लाट् वैद्यन् |

## सस्यानाम् औषधगुणान् लिखतु।

| | | |
|---|---|---|
| निम्बः | - | व्रणनाशकः |
| आमलकी | - | ऊर्जप्रदायिनी |
| तुलसी | - | विषहारिणी |

| | | |
|---|---|---|
| हरिद्रा | - | रोगगुणनाशिनी |
| अशोकः | - | रक्तशोधकः |
| कर्णिकारः | - | वातहारीणि |
| ईश्वरमूली | - | स्मृतिवर्धकः |
| ब्रह्मी | - | स्मृतिवर्धकः |

**प्रस्तावना द्वयं पठत। अधस्तात्  साधु उत्तरं किमिति लिखत।**

१. प्रथमं द्वितीयं साधु।

२. प्रथमं द्वितीयं साधु।

३. प्रथमं वाक्यं साधु।

## चतुर्थः पाठः
## काव्यदीपशिखा

**विग्रहंपदानि लिखत।**

| | | |
|---|---|---|
| विदर्भाधिपति | - | अन्यः वृक्षः |
| नक्षत्रनाथः | - | नक्षत्राणां नाथः |
| नरेन्द्रमार्गः | - | विदर्भस्य अधिपतिः |
| षट्पदालीः | - | षट्पदानाम् आलीः |
| वृक्षान्तरम् | - | नरेन्द्रस्य मार्गः |

**पदच्छेदः**

| | | |
|---|---|---|
| लेभेऽन्तरं | - | लेभे +अन्तरं |
| कालेऽन्तरं | - | ......... + ............. |
| दिनेऽन्तरं | - | ......... + ............. |
| वृक्षेऽन्तरं | - | ......... + ............. |

| | | |
|---|---|---|
| नोपदेशः | - | न + उपदेशः |
| नोपलभ्यते | - | ......... + ............. |
| नोचितम् | - | ......... + ............. |
| नक्षत्रनाथांशुरिव | - | नक्षत्रनाथांशुः + इव |
| गुरुरिव | - | ......... + ............. |
| लघुरिव | - | ......... + ............. |
| साधुरिव | - | ......... + ............. |

**श्लोकं पठित्वा प्रश्नानानामुत्तरं लिखत।**

१) स्वसुर्विदर्भाधिपतेस्तदीयो
लेभेऽन्तरं चेतसि नोपदेशः।
दिवाकरादर्शनबद्धकोशे
नक्षत्रनाथांशुरिवारविन्दे ॥

१. अस्मिन् श्लोके क्रियापदं किम् ?

२. किं न लेभे ?

३. कः इव न लेभे ?

४. कस्याः चेतसि उपदेशः अन्तरं न लेभे ?

५. श्लोके पद्म इत्यर्थे प्रयुक्तं पदं किम् ?

६. अधोरेखाङ्कितपदस्य पदच्छेदं लिखत ?

७. चेतसि इत्यत्र का विभक्तिः ?

२) **सञ्चारिणी दीपशिखेव रात्रौ**
**यं यं व्यतीयाय पतिंवरा सा ।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे**
**विवर्णभावं स स भूमिपालः ॥**

१. अस्मिन् श्लोके क्रियापदं किम् ?

२. किं प्रपेदे ?

३. पतिवरा का ?

४. पदच्छेदं लिखत दीपशिखेव

५. कः विवर्णभावं प्रपेदे ?

६. "पतिं वृणीते या सा इत्यस्य एकपदं किम् ?

७. श्लोके राजा इत्यर्थे प्रयुक्तं पदं किम् ?

३) **तं प्राप्य सर्वावयवानवद्यं**
**व्यावर्ततान्योपगमात्कुमारी ।**
**न हि प्रफुल्लं सहकारमेत्य**
**वृक्षान्तरं काङ्क्षति षट्पदाली ॥**

१. अस्मात् श्लोकात् एकं क्रियापदं लिखत ?

२. श्लोकात् एकं ल्यबन्तपदं चित्वा लिखत ?

३. कुमारी कस्मात् व्यावर्तत ?

४. अन्यः वृक्षः इत्यस्य एकपदं लिखत ?
५. श्लोके विकसितम् इत्यर्थे प्रयुक्तं पदं किम् ?
६. षट् पदानाम् आलि इत्यस्य एकपदं लिखत ।

४. **कुलेन कान्त्या वयसा नवेन**
**गुणैश्च तैस्तैर्विनयप्रधानैः ।**
**त्वमात्मनस्तुल्यममुं वृणीष्व**
**रत्नं समागच्छतु काञ्चनेन ॥**

१. अस्मात् श्लोकात् एकं क्रियापदं लिखत ?
२. अधोरेखाङ्कितपदस्य पदच्छेदं लिखत
३. विनयप्रधानैः इत्यस्य विग्रहं कथं भवति ?
४. रत्नं केन समागच्छतु ?
५. स्वानुरूपं इत्यर्थे श्लोके प्रयुक्तं पदं किम् ?
६. कुलेन इत्यत्र विभक्तिः का ?

**आस्वादनटिप्पणीं लिखत।**

**सञ्चारिणी दीपशिखेव रात्रौ**
**यं यं व्यतीयाय पतिंवरा सा ।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे**
**विवर्णभावं स स भूमिपालः** ॥

महाकविकालिदासस्य रघुवंशमहाकाव्यात् उद्धृतोऽयं श्लोकः । इन्दुमतीस्वयंवरमत्र प्रतिपादयति । यथा निशायां सञ्चारिणी दीपज्वाला नरेन्द्रमार्ग प्रपद्य अट्टान् अतीत्य तान् निष्प्रभान् करोति तथा स्यंवरसन्नद्धा सा इन्दुमती यं यं राजकुमारम् अतीतवती तस्य तस्य मुखं विवर्णभावम् अभवत् इति श्लोके प्रतिपादयति । अनेन वर्णनापाटवेन दीपशिखाकालिदासः इति प्राप्तवान् कालिदासमहाकविः । महाकवे उपमालङ्कारप्रयोगसामर्थ्यं द्रष्टुं शक्यतेऽत्र ।

**पञ्चमहाकाव्यान्यधिकृत्य टिप्पणीं लिखत ।**

कवेः भावः कर्म वा काव्यम् । काव्यम् द्विविधं भवति दृश्यकाव्यं श्रव्यकाव्यम् इति । भवन्ति । तानि नाटकचलच्चित्रादीनि दृश्यकाव्यानि दर्शननापि आस्वदितुं शक्यन्ते । श्रव्यकाव्यं तु श्रवणेन एव आस्वदितुं शक्यते। महाकाव्यादीनि श्रव्यकाव्यानि भवन्ति । महाकविः कालिदासः, भारविः,

माघः, मेल्पत्तूर्नारायणभट्टपादः, सुकुमारकविः इत्यादयः महात्मानः संस्कृते प्रसिद्धाः कवयः भवन्ति। संस्कृतसाहित्ये पञ्चमहाकाव्यनि प्रसिद्धानि। तेषु महाकविकालिदासस्य कुमारसंभवम्, रघुवंशम्, माघस्य शिशुपालवधम्, भारवेः किरातार्जुनीयम्, श्रीहर्षस्य नैषधीयचरितम् च प्रथितानि। एतेषां कृतीनां पठनेन तत्तत्कालीनजीवितव्यवस्थामपि ज्ञातुं शक्यते। तानि काव्यानि अद्यापि आस्वादकानां मनोरञ्जकानि भवन्ति। महाकवीनां वर्णनापाटवम् अद्वितीयं भवति।

**कुमारसम्भवम्।**

कविकुलगुरुणा कालिदासेन विरचितं महाकाव्यं भवति कुमारसम्भवम्। अस्मिन् काव्ये सप्तदशसर्गाः सन्ति। किन्तु पार्वतीपरमेश्वरयोः विवाहपर्यन्ता कथा एव कविकुलगुरुणा कालिदासेनोपवर्णितेति श्रूयते। काव्यमिदं वस्तुनिर्देशरूपेण मङ्गलाचरणेनैवारब्धम्। अस्मिन् काव्ये नायकः श्रीपरमेश्वरः नायिका पार्वती च। तारकासुरवधाय देवैरभिलषितस्य शिवात्मजस्य कुमारस्य सम्भव एव मुख्यकथांशः।

**रघुवंशम्।**

महाकविना कालिदासेन विरचितं महाकाव्यं भवति रघुवंशम्। प्रौढकाव्ये रघुवंशे एकोनविंशति सर्गाः सन्ति। काव्यमिदं 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये' इत्यारभ्यते। सूर्यवंशराजस्य दिलीपस्य नन्दीनीप्रसादेन जातस्य पुत्रस्य रघोः तथा रघोर्वंशे जातानामग्निवर्णपर्यन्तानां राज्ञामेव कथा रघुवंशमिति कीर्त्यते।

**किरातार्जुनीयम्।**

पञ्चमहाकाव्येषु अर्थगौरवेण सविशेषं स्थानमावहति भारवेः किरातार्जुनीयम्।"उपमा कालिदासस्य भारवेरर्थगौरवम्" इति प्रथा किरातार्जुनीयस्य गौरवं नितरां व्यनक्ति। महाभारतस्य वनपर्वणि वर्णितस्य अर्जुनस्य पाशुपतास्त्रप्राप्तिः एव अष्टादश सर्गात्मकस्य अस्य महाकाव्यस्य इतिवृत्तम्।

**शिशुपालवधम्।**

काव्याङ्गभूतैः अलङ्कारैरर्थगौरवेण पदलालित्येन च व्यतिरिच्य विलसति माघस्य शिशुपालवधम्। माघविरचितत्वादस्य माघमिति नामान्तरमप्यस्ति। "नवसर्गगते माघे नवशब्दो न विद्यते, माघे माघे गतं वयः, माघे सन्ति त्रयोगुणाः" इत्याद्युक्तयः महाकाव्यस्य माघस्य वैशिष्ट्यं सुतरां प्रकाशयन्ति। काव्येऽस्मिन् विंशतिस्सर्गास्सन्ति। चेदिराजस्य शिशुपालस्य द्वारकाधीशस्य श्रीकृष्णस्य च मिथः संवृत्तः सङ्ग्रामः अन्ते शिशुपालस्य वधश्चास्य काव्यस्य प्रमेयः।

**नैषधीयचरितम्।**

श्रीहर्षेण विरचितं महाकाव्यं भवति नैषधीयचरितम्। अस्य आशयगम्भीरतया 'नैषधं विद्वदौषधम्' इत्युक्तिरप्यस्ति। कुमारसम्भवादीनी महाकाव्यानि द्राक्षापाकानि किन्तु नैषधीयचरितं तु नालिकेरपाकमिवेति सहृदयानामभिप्रायः। 'उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इत्युक्त्या

नैषधीयस्याधृष्यत्वं स्फुटं प्राकटयत्। काव्येऽस्मिन् एकविंशति सर्गाः सन्ति। निषाधाधिपतेः नलस्य वैदर्भ्याः दमयन्त्याः च मिथः अनुरागः पश्चात्तेषां विवाहादयः नैषधीयचरिते अनुवर्णिताः।

## उत्तरसूची

**विग्रहंपदानि लिखत।**

| | | |
|---|---|---|
| विदर्भाधिपति | - | विदर्भस्य अधिपतिः |
| नक्षत्रनाथः | - | नक्षत्राणां नाथः |
| नरेन्द्रमार्गः | - | नरेन्द्रस्य मार्गः |
| षट्पदालीः | - | षट्पदानाम् आलीः |
| वृक्षान्तरम् | - | अन्यः वृक्षः |

**पदच्छेदः**

| | | |
|---|---|---|
| लेभेऽन्तरं | - | लेभे +अन्तरं |
| कालेऽन्तरं | - | काले + अन्तरं. |
| दिनेऽन्तरं | - | दिने + अन्तरं |
| वृक्षेऽन्तरं | - | वृक्षे + अन्तरं |

| | | |
|---|---|---|
| नोपदेशः | - | न + उपदेशः |
| नोपलभ्यते | - | न + उपलभ्यते |
| नोचितम् | - | न + उचितम् |
| नक्षत्रनाथांशुरिव | - | नक्षत्रनाथांशुः + इव |
| गुरुरिव | - | गुरुः + इव |
| लघुरिव | - | लघुः + इव |
| साधुरिव | - | साधुः + इव |

**श्लोकं पठित्वा प्रश्नानानामुत्तरं लिखत।**

१. लेभे।

२. अन्तरम् ।

३. नक्षत्रनाथांशुः इव ।

४. विदर्भाधिपतेः स्वसुः ।

५. अरविन्दम् ।

६. लेभे + अन्तरम् ।

७. सप्तमी ।

१. प्रपेदे / व्यतीयाय ।

२. विवर्णभावम् ।

३. सा ।

४. दीपशिखा + इव ।

५. भूमिपालः ।

६. पतिवरा ।

७. भूमिपालः ।

१. काङ्क्षति / व्यावर्तत।

२. प्राप्य / एत्य ।

३. अन्योपगमात् ।

४. वृक्षान्तरम् ।

५. प्रफुल्लम् ।

६. षट्पदाली ।

१. वृणीष्व / समागच्छतु ।

२. गुणैः + च ।

३. विनयः प्रधानम् एषां तैः।

४. काञ्चनेन ।

## पञ्चमः पाठः।

## सञ्जय उवाच।

१. एम् आर् नायर् इति विख्यातः कः ?

(माणिक्कोत्त् रामुण्णि नायर् , कोकिलः, शङ्कुण्णि नायर्, )

२. माणिक्कोत्त् रामुण्णि नायर् महाशयस्य तूलिकानाम किम् ?

(विलासिनी, सञ्जयन् , सुमङ्गला)

३. सञ्जयन् कस्मिन् वर्षे जनिमलभत ?

(१९८० जूण् १६, १९०३ जूण् १३, १९२३ जूण् २३)

४. सञ्जयन् कुत्र जनिमलभत ?

(तलश्शेरि जनपदे , कोषिक्कोट्, तिरुवनन्तपुरे)

**समानपदानि**

| | | |
|---|---|---|
| उवाच | - | अवदत् |
| विमुखः | - | अलसः |
| निष्णातः | - | पण्डितः |
| प्रसिद्धः | - | प्रमुखः |
| कलत्रं | - | पत्नी |

**पदच्छेदः**

| | | |
|---|---|---|
| केचिन्मन्यते | - | केचित् + मन्यते |
| साहित्यविचारणैव | - | साहित्यविचारेण + एव |
| आसीदयं | - | आसीत् + अयम् |
| अतीवतात्पर्योयम् | - | अतीवतत्परः + अयम् |

**विग्रहपदानि**

| | | |
|---|---|---|
| दुःखभूयिष्ठं | - | अतिशयेन बहुः भूयिष्ठम्, दुखैः भूयिष्ठम्। |
| पुत्रकलत्रयोः | - | पुत्रः च कलत्रं च पुत्रकलत्रे तयोः। |
| आत्मक्लेशम् | - | आत्मनः क्लेशः, आत्मक्लेशः तम्। |
| राजयक्षमणाः | - | यक्षाणां राजा राजयक्ष्माः, तेन |

**तूलिकानाम लिखत।**

१. माणिक्कोत्त् रामुण्णि नायर् - सञ्जयन् ।

२. वेङ्ङयिल् कुञ्ञिरामन् नायनार् - ..................................
३. माधवन् नायर् - ..................................
४. एम् के मेनोन् - ..................................
५. वि वि अय्यप्पन् - ..................................
६. लीला नम्पूतिरिप्पाट् - ..................................
७. वल्लत्तोल् नारायणमेनोन् - ..................................
८. उल्लूर् एस् परमेश्वर अय्यर् - .................................
९. कुमारनाशान् - ...................................
१०. ओ एन् वेलुकुरुप्प् - ...................................
११. एम् टि वासुदेवन् नायर् - ...................................

**जीवनचरितम्।**

**१. सञ्चयन्**

माणिक्कोत्त् रामुण्णि नायर् केरलेषु तलश्शेरि प्रदेशे १९०३ जूण् २३ तमे दिनाङ्के अजायत। तस्य पितरौ माटाविल् कुञ्जिरामन् वैद्यर्, माणिक्कोत्त् पारु अम्मा च। सः एव आर् नायर् इति ह्रस्वनाम्ना पश्चात् सञ्चयन् इति तूलिका नाम्ना च प्रसिद्धः अभवत्। सः अध्यापकः, सम्पादकः, हास्यसाहित्यकारः, साहित्यनिरूपकःच आसीत्। तेन विरचिताः प्रसिद्धाः ग्रन्थाः भवति। हास्याञ्जलिः, अद्योपहारः, सञ्चयन् (६ भागाः) साहित्यनिकषः। सः १९४३ तमे वर्षे दिवङ्गतोऽभवत्।

नाम - ...............................................
जननम् - ...............................................
पितरौ - ...............................................
प्रवर्तनमण्डलम् - ...............................................
तूलिकानाम - ...............................................
प्रधानकृतयः - ...............................................
मृत्युः - ...............................................

२. केरलीयहास्यसाहित्यकारेषु अन्यतमोऽस्ति ई वि कृष्णप्पिल्ला। अभिनेता, विमर्शकः, अभिभाषकः, सामाजिकः, लेखकः इति वैविध्यपूर्णेषु मण्डलेषु स प्रसिद्धः अभवत्। सामाजिकविमर्शनावसरे 'त्रिलोकसञ्चारी' इति तूलिकाभिधा तेन स्वीकृता। सः कोल्लं जिल्लायां शास्तांकोट्टा देशे १८९४ सेप्तम्बर् मासस्य १४ तमे दिने अजायत। कुन्नत्तूर् पप्पु पिल्ला,

इञ्चक्काट् वीट्टिल् कल्याणियम्मा च तस्य पितरौ। सीतालक्ष्मी, राजा केशवदासन्, इरविक्कुट्टि पिल्ला, रामराजाभिषेकम्, तिलोत्तमा इत्यादयः अस्य महाशयस्य प्रधानकृतयः भवन्ति। प्रसिद्धः हास्याभिनेता परेतः अटूर् भासिमहाशयः अस्य पुत्रोऽस्ति। १९३८ मार्च् ३० तमे दिने सः निर्यातोऽभवत्।

| | | |
|---|---|---|
| नाम | - | ............................................... |
| जननम् | - | ............................................... |
| पितरौ | - | ............................................... |
| प्रवर्तनमण्डलम् | - | ............................................... |
| तूलिकानाम | - | ............................................... |
| प्रधानकृतयः | - | ............................................... |
| मृत्युः | - | ............................................... |

**उदाहरणानुसारं संख्याः अक्षररूपेण लिखतु**

| | | |
|---|---|---|
| १९५० | - | पञ्चाशदधिकनवशतोत्तरसहस्रम् |
| १९४७ | - | सप्तचत्वारिंशदधिकनवशतोत्तरसहस्रम् |
| १९८७ | - | ................................................। |
| १९६५ | - | ................................................। |
| २००८ | - | ................................................। |
| १९८४ | - | ................................................। |
| १८६५ | - | ................................................। |
| २०२५ | - | ................................................। |

## उत्तरसूची

१ माणिक्कोत्त् रामुण्णि नायर्

२ सञ्जयन्

३ १९०३ जूण् १३

४. तलश्शेरि जनपदे

**तूलिकानाम लिखत।**

केसरी

माली

विलासिनी

कोविलन्

सुमङ्गला

वल्लत्तोल्

उल्लूर्

आशान्

एम् टि

| | | |
|---|---|---|
| नाम | - | माणिक्कोत्त् रामुण्णि नायर् |
| जननम् | - | तलश्शेरि प्रदेशे १९०३ जूण् २३ तमे दिनाङ्के |
| पितरौ | - | माटाविल् कुञ्जिरामन् वैद्यर्, माणिक्कोत्त् पारु अम्मा च |
| प्रवर्तनमण्डलम् | - | अध्यापकः, सम्पादकः, हास्यसाहित्यकारः, साहित्यनिरूपकः |
| तूलिकानाम | - | सञ्चयन् |
| प्रधानकृतयः | - | हास्याञ्जलिः, अद्योपहारः, सञ्चयन् (६ भागाः) साहित्यनिकषः |
| मृत्युः | - | १९४३ तमे वर्षे दिवङ्गतोऽभवत्। |

| | | |
|---|---|---|
| नाम | - | ई वि कृष्णप्पिल्ला |
| जननम् | - | कोल्लं जिल्लायां शास्तांकोट्टा देशे १८९४ सेप्तम्बर् मासस्य १४ तमे दिने |

| | | |
|---|---|---|
| पितरौ | - | सीतालक्ष्मी, राजा केशवदासन् |
| प्रवर्तनमण्डलम् | - | अभिनेता, विमर्शकः,अभिभाषकः, सामाजिकः, लेखकः |
| तूलिकानाम | - | त्रिलोकसञ्चारी |
| प्रधानकृतयः | - | राजा केशवदासन्, इरविक्कुट्टि,पिल्ला, रामराजाभिषेकम्, तिलोत्तमा |
| मृत्युः | - | ............................................... |

| | | |
|---|---|---|
| १९५० | - | पञ्चाशदधिकनवशतोत्तरसहस्रम् |
| १९४७ | - | सप्तचत्वारिंशदधिकनवशतोत्तरसहस्रम् |
| १९८७ | - | अष्टसप्तत्यधिकनवशतोत्तरसहस्रम्। |
| १९६५ | - | पञ्चषष्ठ्यधिकनवशतोत्तरसहस्रम्। |
| २००८ | - | अष्टाधिकद्विसहस्रम्। |
| १९८४ | - | अष्टचत्वारिंशतधिक नवशताधिक सहस्रम्। |
| १८६५ | - | पञ्चषष्ट्यधिक अष्टशतोत्तर सहस्रम्। |
| २०२५ | - | पञ्चविंशत्यधिक द्विसहस्रम्। |

**षष्ठः पाठः।**

**भुवि पूर्वं न दृश्यते।**

१. साहित्यसङ्गीतकलाविहीनाः .......... समानाः भवन्ति।
पशुः।
२. सहित्यसङ्गीतकलाविहीनाः पशुसमानाः इति केन उक्तम् ?
भर्तृहरिणा। ३.
३. कलाः कुसुममिव ......... भवति।
निर्मला।
४. दृश्यकाव्यं ............ इति व्यवह्रियते।
रूपकम्। ५.
५. रूपकाणि कति ?
दश।
६. मत्तविलासप्रहसनस्य कर्ता कः ?
महेन्द्रविक्रमः .
७. भगवदज्जुकस्य कर्ता कः ?
बोधायनः।
८. भगवदज्जुकम् कस्मिन् विभागे अर्न्तभवति ?
प्रहसनम्।
९. दासी इत्यस्य समानार्थकं पदं लिखत ?
चेटी।
१०. सह शब्दयोगे का विभक्तिः ?
तृतीया।
११. अवधूतः - समानार्थकं पदं लिखत ?
परिव्राजकः।
१२. वसन्तसेना कया सह आरामम् आगच्छति ?
चेट्या।
१३. विषसर्पदंशनेन का मूर्छिता ?

वसन्तसेना।

१४. शाण्डिल्यः कः ?

परिव्राजकस्य शिष्यः।

१५. कीदृशः शाण्डिल्यः गुरुणा सह तर्कयति ?

भोजनैकप्रियः पठनविमुखश्च।

१६. वसन्तसेनायाः प्राणान् हर्तुमागतः कः ?

यमकिङ्करः।

१७. वसन्तसेना का ?

अज्जुका।

१८ . अज्जुके ! गानमेकम् आलपतु - अत्र सम्बोधनपदं चित्वा लिखत ?

अज्जुके !

१९. गणिका इत्यस्य समानपदं लिखत ?

अज्जुका।

**पदच्छेदः**

| | | |
|---|---|---|
| अचिरादेव | - | अचिराद् एव |
| चान्यत्र | - | च अन्यत्र |
| प्रायेणैव | - | प्रायेण एव |
| पुनर्गच्छति | - | पुनः गच्छति |
| क्षणादेव | - | क्षणाद् एव |
| वेलेयम् | - | वेला इयम् |
| उत्थितैषा | - | उत्थिता एषा |

**विग्रहवाक्यं लिखत।**

वनपर्वतान् -

जीवापहरणम् -

प्रत्यागतप्राणा -

क्षीणायुषाम् -

मनोवेगेन -

अतिचौक्षिणी -

**दशरूपकाणां पट्टिका**

| **रूपकम्** | **ग्रन्थः** | **ग्रन्थकारः** |
|---|---|---|
| नाटकम् | अभिज्ञानशाकुन्तलम् | कालिदासः |
| भाणः | शृङ्गारभूषणभाणः | वामनभट्टः |
| प्रहसनम् | भगवदज्जुकम् | बोधायनः |
| व्यायोगः | मध्यमव्यायोगः | भासः |
| ईहामृगः | रुक्मिणीहरणम् | वत्सराजः |
| समवकारः | पञ्चरात्रम् | भासः |
| डिमः | त्रिपुरविजयम् | वत्सराजः |
| प्रकरणम् | मृच्छकटिकम् | शूद्रकः |
| अङ्कः | उन्मत्तराघवम् | भास्करः |
| वीथी | प्रेमाभिरामः | रविपतिः |

**पट्टिकां पूरयत।**

| **रूपकम्** | **ग्रन्थः** | **ग्रन्थकारः** |
|---|---|---|
| नाटकम् | अभिज्ञानशाकुन्तलम् | कालिदासः |
| ..................... | प्रेमाभिरामः | रविपतिः |
| प्रहसनम् | ............................... | बोधायनः |
| व्यायोगः | मध्यमव्यायोगः | .................... |
| भाणः | शृङ्गारभूषणभाणः | ...................... |

| | | |
|---|---|---|
| समवकारः | ............................ | भासः |
| डिमः | त्रिपुरविजयम् | वत्सराजः |
| ............................ | मृच्छकटिकम् | शूद्रकः |
| अङ्कः | ......................... | भास्करः |
| ईहामृगः | रुक्मिणीहरणम् | ........................... |

**सम्बोधनपदानि ।**

**नामपदानि** **सम्बोधनपदानि**

१. मधुकरिका - मधुकरिके !
२. परिव्राजकः - परिव्राजक !
३. भगवान् - भगवन् !
४. मूर्खः - मूर्ख !
५. निस्नेहः - निस्नेह !
६. कर्कशहृदयः - कर्कशहृदय !
७. यमकिङ्करः - यमकिङ्कर !
८. अज्जिका - अज्जुके !
९. अकरुणः - अकरुण !
१०. दुष्टबुद्धिः - दुष्टबुद्धे !
११. भिन्नचारित्रः - भिन्नचारित्र !
१२. शाण्डिल्यः - शाण्डिल्य !

**कथापात्रनिरूपणम्।**

दृश्यकाव्यं रूपकमिति व्यवह्रियते । रूपकाणि नाटकादिभेदेन दश भवन्ति । तेषु अन्यतमं प्रहसनमिति कथ्यते ।अमानुषवृत्तीनां कल्पना, अस्पष्टभाषणं, भाषाप्रयोगेषु वैकल्यम् इत्यादीनि हास्यरसप्रधानेषु प्रहसनेषु प्रायेण दृश्यते । प्रहसनेषु अन्यतममं भवति बोधायनस्य भगवदज्जुकम् । तत्र कस्यचित् परिव्राजकस्य शिष्यः भवति शाण्डिल्यः । सः भोजनैकप्रियः पठनविमुखः च भवति। विवेकशून्यः शाण्डिल्यः नितरां गुरुणा सह तर्कयति । हास्यकथापात्रमिदं सर्वदा विकलवाक्यमेव वदति। अद्यापि प्रहसनेषु शाण्डिल्यस्य कथापात्रमेव सहृदयाह्लाददायकं भवति ।

## सप्तमः पाठः
## तैय्यम्

१. नृत्तं, गीतं, वाद्यम् इत्येतानि ........... इत्युच्यते।
तौर्यत्रिकम्।

२. ग्राम्यरूपभेदोऽस्ति - पदच्छेदं लिखत।
ग्राम्यरूपभेदः + अस्ति।

३. शिरोऽलङ्कारः - विग्रहवाक्यं लिखत ?
शिरसः अलङ्कारः।

४. अतिसुन्दरेऽस्मिन् - पदच्छेदं लिखत ?
अतिसुन्दरे + अस्मिन्।

५. विविधस्य भावः इत्यस्य एकपदं लिखत ?
वैविध्यम्।

६. भूमावागता - पदच्छेदं लिखत ?
भूमौ + आगता।

७. उत्तरकेरलीयानां परम्परागतम् अनुष्ठानकलारूपं किम् ?
तेय्यम्।

८. ईश्वरः इत्यर्थे कैरल्यां प्रसिद्धपदं किम् ?
दैवम्।

९. दैवम् इति पदस्य ग्राम्यरूपभेदः भवति .............।
तेय्यम्।

१०. परम्परया आगतम् - एकपदं लिखत ?
परम्परागतम्।

११. शिरोभूषणम् इत्यस्य विग्रहवाक्यं लिखत ?
शिरसः भूषणम्।

१२. आर्तानां जनानां समाश्वासयितुं भूमावागता देवता का ?
तेय्यम्।

१३. तेय्यम् इति कलारूपे कति विधाभिनयाः सन्ति ?

चतुर्विधाभिनयाः ।
१४. तेय्यरूपं कुत्र प्रविश्य नृत्यति ?
क्षेत्राङ्कणम् ।
१५. सः नर्तकः ........... इति व्यवह्रियते ?
कोलधारी ।
१६. तेय्यम् इति कलारूपे उपयुज्यमानानि वाद्योपकरणानि कानि ?
चेण्डा, चीनि, तुटि, इलत्तालम् ।
१७. कोलधारिणः मूर्तिभेदानुसारं ......... धरन्ति ।
आयुधान् ।
१८. अनुष्ठानं च तत् कलारूपं च ................।
अनुष्ठानकलारूपम् ।
१९. ग्रामे भवं .............। ग्राम्यम् ।
२०. क्षेत्रस्य अङ्कणम् ................।
क्षेत्राङ्कणम् ।
२१. कोलधारिणः मूर्त्तिभेदानुसारं कानि आयुधानि धरन्ति ?
चापः, बाणः, दण्डः, खड्गः, चर्म ।
२२. तेय्यम् इति कलारूपस्य शिरोभूषणं ..... इति कथ्यते ?
मुटि ।
२३. दरीदृश्यते - विग्रहवाक्यं लिखत ?
भृशं पुनः पुनः वा दृश्यते ।
१४. तेय्यरूपेषु मातृदेवताः काः ?
भद्रकाली, नागभगवती, चामुण्डी, मुच्चिलोट्ट् भगवती।
२५. तेय्यरूपेषु पुरुषमूर्त्तयः के ?
गुलिकः, विष्णुमूर्तिः, घण्टाकर्णः, विषकण्ठः।
२६. मुटियेट्ट् कलारूपस्य इतिवृत्तम् किम् ?
भद्रकाल्या कृतः दारिकवधम् ।
२७. अस्मिन् कलारूपे उपयुज्यमानानि वाद्योपकरणानि कानि ?
चेण्टा, कुरुंकुऴल्, इलत्तालं, कोम्प् ।
२८. मुटियेट्ट् कदा अवतारयति ?
अर्धरात्रावारभ्य प्रभातपर्यन्तम् ।
२९. दक्षिणकेरले प्रचलितं प्राचीनकलारूपं भवति ...........।

पटयणी।

३०. पटयणी इति कैरलीपदं कुतः स्वीकृतम् भवति ?
भटश्रेणी इति संस्कृतशब्दात्।

३१. पटयणी कलारूपं कुत्र प्रचलति ?
भद्रकालीमन्दिरेषु।

३२. पूर्वं कलारूपस्य अवतरणाय कति दिनानि अवश्यकानि आसीत् ?
त्रयोदशदिनानि।

३३. काच्चिक्कोट्ट् इति अनुष्ठानं केन वाद्येन क्रियते ?
तप्प्।

३४. जनान् पटयणीसमाचरणम् उद्बोधयितुं किं आचरति ?
काच्चिक्कोट्ट्।

३५. पूगपत्रेषु क्रियमाणं मुखपटं किमित्युच्यते ?
कोलम्।

३६. प्रसिद्धानि कोलरूपाणि कानि ?
यक्षिक्कोलम्, पक्षिक्कोलम्, कालन्कोलम्, पिशाचक्कोलम् माटन्कोलम्, मरुतक्कोलम्, गन्धर्वन् कोलम्।

३७. युनस्को संस्थया अङ्गीकृतं केरलीय कलारूपं किम् ? कूटियाट्टम्। ३८. कूटियाट्टे उपयुज्यमानं वाद्योपकरणं किम् ? मिषाव्।

३९. कूटियाट्टे अरङ्गुतलि ......... नाम्ना व्यवह्रियते।
पूर्वरङ्गक्रिया।

४०. कूटियाट्टम् युनस्क्को संस्थया कस्मिन् वर्षे विश्वपैतृककलारूपेण समादृतम्।
२००६.

४१. कूटियाट्टम् इति मलयालपदस्य निर्वचनं किम् ?
मिलित्वा नटनम्।

४२. कूटियाट्टे नान्दीश्लोकं कः पठति ?
सूत्रधारः।

४३. आशीश्लोकः भवति ....................।
भरतवाक्यम्।

४४. कूटियाट्टे सर्ववस्तुसमर्पणं भवति .............।
मुटियक्कित्ता।

४५. दृश्यकाव्यस्य नामान्तरमस्ति ?

रूपकम्।

| वाद्योपकरणम् | अलङ्कारवस्तूनि |
|---|---|
| चेण्टा | हरिद्रा |
| चीनि | मनयोला |
| तुटि | नालिकेरपत्रम् |
| इलत्तालम् | चायिल्यम् |
| | अञ्जनमसी |

**लघुटिप्पणि**

## तेय्यम्।

उत्तरकेरलीयम् अनुष्ठानकलारूपं भवति तेय्यम्। इदं कलारूपं देवालयेषु अनुष्ठीयते। पूर्विकाणां वीरपुरुषाणां वीरचरितस्य अनुस्मरणाय कलारूपमिदं प्रादुरभूत्। अस्य सर्वत्र तेय्यम् इति सामान्यसंज्ञा भवति। तेय्यकोलधारी वाद्यघोषानुसारं चटुलनृत्तं करोति। भक्तानां प्रार्थनां श्रुत्वा तेभ्यः अनुग्रहं च प्रददाति। अतिसुन्दरे अस्मिन् कलारूपे चतुर्विधाभिनयाः वर्तन्ते। नृत्तावसरे चेण्डा, चीनि, तुटि, इलत्तालम् इत्येदानि वाद्योपकरणानि वादयति। कोलधारिणः मूर्तिभेदानुसारं चापः, बाणः, दण्डः, खड्गः, चर्म, इत्यादीन् आयुधान् धरन्ति। अस्य कलारूपस्य शिरोभूषणं मुटिः इति कथ्यते। मनयोला, चायिल्यम्, हरिद्रा, अञ्जनमसी, नालिकेरपत्रम्, इत्येदादीनि अलङ्काराय कल्पन्ते। तैय्यकलारूपे भद्रकाली, नागभगवती, चामुण्डि,मुच्चिलोट्ट् भगवती इत्येताः मातृदेवताः भवन्ति। गुलिकः, विष्णुमूर्तिः, घण्टाकर्णः,विषकण्ठः इत्येते बहवः पुरुषमूर्तयः च विद्यन्ते। अनुष्ठानकलारूपमिदं सर्वथा सर्वेषाम् आनन्ददायकं भवति।

**तेय्यम् इति कलारूपे प्रयुक्ताः सङ्केतसंज्ञाः**

| | | | |
|---|---|---|---|
| १. | नृत्तगीतवाद्यम् | - | तौर्यत्रिकम्। |
| २. | दैवम् | - | तेय्यम्। |
| ३. | तेय्यवेषधारी | - | कोलधारी |
| ४. | शिरोऽलङ्कारः | - | मुटिः |
| ५. | अङ्गरागः | - | കുറിക്കൂട്ട് |

| | | | |
|---|---|---|---|
| ६. | चायिल्यम् | - | जातिलिंग इति नाम्ना व्यवह्रियमाणः वर्णः। |
| ७. | मनयोला पीतवर्णं धातु। | - | विविधकेरलीयकलारूपेषु मुखलेपनाय उपयुज्यमानं (മഞ്ഞനിറം) |
| ८. | अञ्जनमसी | - | नेत्रसौन्दर्याय उपयुज्यमानम् अञ्जनम्। (കൺമഷി) |
| ९. | नारिकेलपत्रम् | - | കുരുത്തോല |

| **चतुर्विधाभिनयाः** |
|---|
| १. आङ्किकम् |
| २. वाचिकमा |
| ३. सात्विकम् |
| ४. आहार्यम् |

**अष्टमः पाठः**

**कुरुसिंहावलोकनम्।**

१. गरुडः इत्यस्य समानपदं लिखत ?
वैनतेयः ।

२. निर्गतः सारः यस्मात् तत् ...................।
निःस्सारम् ।

३. विनतायाः अपत्यं पुमान् ...................। वैनतेयः

४. अलं शब्दयोगे का विभक्तिः ?
तृतीया

५. वस्त्रापणं गत्वा प्रिया विविधेभ्यः वस्त्रेभ्यः उचितं वस्त्रं क्रीणाति अत्र कः न्यायः ?
नीरक्षीरन्यायः

६. शताभिषिक्तः पितामहः एकान्ते स्वस्य जीवनम् अनुस्मरति अत्र न्यायः कः ?
सिंहावलोकनन्यायः

७. कश्चित् दरिद्रः युवा कठिनेन परिश्रमेण क्रमेण आपणावलिं स्थापयामास - अत्र न्यायः कः ?
सोपानारोहणन्यायः

८. न्यायाधिपेन दण्डितः चोरः कारागारे स्थित्वा स्वापराधान् अचिन्तयत् - अत्र कः न्यायः ?
सिंहावलोकनन्यायः

९. अध्यापकः चलच्चित्रगानं श्रावयित्वा विविधान् अलङ्कारान् पाठयति - अत्र कः न्यायः ?
गुडगुलिकान्यायः

१०. योजनशतं कः याति ?
पिपीलकः

**अत्र कः न्यायः इति लिखतु**

१. वस्त्रापणं गत्वा रीना विविधेभ्यः वस्त्रेभ्यः उचितं वस्त्रं क्रीणाति ।
नीरक्षीरन्यायः ।

२. शताभिषिक्तः पितामहः एकान्ते स्वस्य जीवनम् अनुस्मरति ।

सिंहावलोकन्यायः।

३. कश्चित् दरिद्रः युवा कठिनेन परिश्रमेण क्रमेण आपणावलिं स्थापयामास।

सोपानारोहणन्यायः।

४. न्यायाधिपेन दण्डितः चोरः कारागारे स्थित्वा स्वापराधान् अचिन्तयत्।

सिंहावलोकन्यायः।

५. अध्यापकः चलच्चित्रगानं श्रावयित्वा विविधान् अलङ्कारान् पाठयति।

गुडगुलिकान्यायः।

**पदच्छेदं लिखत।**

| | | |
|---|---|---|
| प्रसिद्धिरस्ति | - | प्रसिद्धिः + अस्ति |
| बालोऽयं | - | बालः + अयम् |
| न्यवेदयच्च | - | न्यवेदयत् + च |
| विमुखस्सन् | - | विमुखः + सन् |
| तदेव | - | तत् + एव |
| यदवश्यम् | - | यत् + अवश्यम् |
| पुनरवालोकयत् | - | पुनः + अवालोकयत् |
| शतान्यपि | - | शतानि + अपि |
| वैनतेयोऽपि | - | वैनतेयः + अपि |

**प्रयोगविशेषं ज्ञात्वा वाक्यं परिवर्तयतु।**

| | | |
|---|---|---|
| १. बालकः कथा रोचते। | - | बालकाय कथा रोचते |
| २. सीता लड्डुकं रोचते। | - | सीतायै लड्डुकं रोचते |
| ३. भ्रमरः मधु रोचते। | - | भ्रमराय मधु रोचते |
| ४. रमा फलरसं रोचते। | - | रमायै फलरसं रोचते |
| ५. राजीवः क्रीडा रोचते। | - | राजीवाय क्रीडा रोचते |
| ६. अनुजा चोकलेहः रोचते। | - | अनुजायै चोकलेहः रोचते |

**नवमः पाठः।**

**द्रष्टव्यं शास्त्रचक्षुषा।**

१. युक्तचिन्तां विना कृतं कार्यं ........... भविष्यति ?

निरर्थकम् ।

२. प्रायेण सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः इति कस्य वचनमिदम् ?

कालिदासस्य ।

३. विचारेण विना कृतं कर्म .......... कारणं भवति ?

आपदां ।

४. न विवेकः .............।

अविवेकः ।

५. विमृश्यकारि - विग्रहवाक्यं लिखत ?

विमर्शं करोति यः सः विमृश्यकारी ।

६. गूणैः लुब्धाः - एकपदं लिखत ?

गुणलुब्धाः ।

७. श्रियः इत्यस्य समानपदं किम् ?

सम्पदः ।

८. विवेकराहित्यं बहूनां ............ निदानं भवति ।

दोषाणां ।

९. धनिकत्वं दरिद्रत्वं च कथं भवति ?

अभिलाषानुसारं ।

१०. वल्कलैस्त्वम् - पदच्छेदं लिखत ?

वल्कलैः + त्वम् ।

११. निर्विशेषः - विग्रहवाक्यं लिखत ?

निर्गतो विशेषः ।

१२. अर्थः अस्य अस्ति इति .......................।

अर्थवान् ।

१३. तृष्णा इत्यस्य समानपदं लिखत ?

अभिलाषः ।

१४. निस्वः इत्यस्य समानपदं किम् ?

दरिद्रः।

१५. परप्रत्ययः - विग्रहवाक्यं लिखत ?

परेषां प्रत्ययः परप्रत्ययः।

१६. सन्तः इत्यस्य समानपदं लिखत ?

विद्वज्जनाः।

१७. किं न सर्वं साधु भवति ?

पुराणमिति।

१८. किं न अवद्यं भवति ?

नवं काव्यम्।

१९. कः परीक्ष्य न भजते ?

मूढः।

२०. गुणदोषविवेचनं कर्तुम् असमर्थः कः ?

अज्ञः।

२१. विद्वज्जनाः सम्यक् परीक्ष्य किं स्वीकुर्वन्ति ?

गुणयुक्तम्।

२२. किं सत्यम् इति ज्ञात्वा तदेव स्वीकरणीयम् कथम् ?

स्वप्रयत्नेन।

**पदच्छेदं लिखत ?**

| | | | |
|---|---|---|---|
| सम इह | - | समः + इह। | |
| वल्कलैस्त्वम् | - | वल्कलैः + त्वम् | |
| सम इह | - | समः + इह। | |
| दरिद्रो यस्य | - | दरिद्रः + यस्य। | |
| कोऽर्थवान् | - | कः + अर्थवान् | |
| को दरिद्रः | - | कः + दरिद्रः | |
| इत्येव | - | इति + एव | - |
| चापि | - | च + अपि | |

१.	सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः

**अन्वयः** ।
सहसा क्रियां न विदधीत गुणलुब्धाः सम्पदः विमृश्यकारिणं स्वयमेव वृणुते हि ।
**भावार्थः**
विचिन्तनं विना किमपि कार्यं न कर्तव्यम् । यतः विवेकराहित्यं बहूनां दोषाणां निदानं भवति । यः सम्यक् विचिन्त्य कार्यं करोति तं जनं गुणभिलाषुकाः सम्पदः स्वयमेव प्राप्नुवन्ति ।

२.	वयमिह परितुष्टाः वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥

**अन्वयः**
इह वयं वल्कलैः परितुष्टाः त्वं दुकूलैः च इह परितोषः समः विशेषः, निर्विशेषः यस्य तृष्णा विशाला स तु दरिद्रः भवति । मनसि परितुष्टे कः अर्थवान् ? कः दरिद्रः ?

**भावार्थः**
अस्मिन् स्थाने (वनप्रदेशे) अस्मादृशो जनः केवलं वल्कलेनापि परितुष्टः भवति । युष्मत्सदृशः दुकूलादिभिः वस्त्रैश्च तत्रापि सन्तुष्टः भवति । आवयोः परितोषः समानः एव । विशेषेण वक्तुम् अत्र किमपि नास्त्येव । यस्य अभिलाषः अतिविस्तृतः भवति स एव दरिद्रः । मनसि सन्तुष्टे सति धनिकत्वं नाम न । दरिद्रता अपि न ।

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते

मूढः परप्रत्ययनेयबुद्धिः ॥

**अन्वयः**

पुराणं इति एव सर्वं साधु न नवम् इति काव्यं न च अवद्यम् सन्तः परीक्ष्य अन्यतरत् भजन्ते मूढः परप्रत्ययनेयबुद्धिः (भवति )

**भावार्थः**

प्राचीनमिति कारणेनैव सर्वमपि काव्यं निर्दोषं न भवति। तथा नूतनमिति हेतुना सकलमपि काव्यं दोषयुक्तं च न। विद्वज्जनाः सम्यक् परीक्ष्य द्वाभ्यां गुणयुक्तम् एकं स्वीकुर्वन्ति। अज्ञस्तु गुणदोषविवेचनं कर्तुं असमर्थः सन् अन्येषाम् अभिमतानुसारं प्रवर्तते।

यदस्ति नास्तीति य एष संशयः
परस्य वाक्यैर्न ममात्र निश्चयः।
अवेत्य तत्त्वं तपसा शमेन च
स्वयं ग्रहिष्यामि यदत्र निश्चितम्।

**अन्वयः**

यत् अस्ति यत् न अस्ति इति एषः यः संशयः अत्र परस्य वाक्यैः मम न निश्चयः तपसा शमेन च तत्त्वम् अवेत्य यद् अत्र निश्चितं (तत्) स्वयं ग्रहिष्यामि।

**भावार्थः**

यत् अस्ति यत् नास्ति इति विषये मम सन्देहोऽस्ति। तथापि अन्यस्य जनस्य वचने मम विश्वासो नास्ति एव। प्रयत्नेन मनोनियन्त्रणेन च स्वयमेव तथ्यं ज्ञात्वा तदेव स्वीकरिष्यामि।

**मम इष्टतमः श्लोकः।**

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥**

महाकविना भारविना विरचितं किरातार्जुनीयम् नाम महाकाव्यात् उद्धृतोऽयं श्लोकः।"उपमा कालिदासस्य भारवेरर्थगौरवम् " इति प्रथा किरातार्जुनीयस्य अर्थगौरवं सूचयति। काव्येऽस्मिन् अष्टादशसर्गाः सन्ति। प्रतिसर्गं एतादृशा सूक्तयप्रतिपादकाः बहवः श्लोकाः सन्ति। अत्र

'विचारेण विना कृतं कर्म आपदां कारणं भवति' इति प्रतिपादयति। विचिन्तनं विना किमपि कार्यं न कर्तव्यम् । यतः विवेकराहित्यं बहूनां दोषाणां कारणं भवति । यः सम्यक् विचिन्त्य कार्यं करोति तं जनं गुणभिलाषुकाः सम्पदः स्वयमेव प्राप्नुवन्ति । काव्यस्वादकाः जीवने कथं व्यवहारः करणीयः इति परोक्षतया उपदिशति महाकवि भारविः ।

**मम इष्टतमः श्लोकः ।**

वयमिह परितुष्टाः वल्कलैस्त्वं दुकूलैः सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ।।

भर्तृहरिणा विरचितात् सुभाषितत्रिशती नाम ग्रान्थात् स्वीकृतोऽयं श्लोकः । अत्र धनिक - दरिद्रयोः साजात्यवैजत्यानि सविस्तरं प्रतिपादयति । वनप्रदेशे केवलं वल्कलं धृत्वा तपोध्यानादिना जीवनं कुर्वन्तः जनाः सन्तुष्टाः भवन्ति। राजप्रासादे पट्टाम्बरादि भूषणालङ्कारैः जीनवं कुर्वन्तः अपि सन्तुष्टाः भवन्ति । एतयोः धनिक - दरिद्रयोः परितोषः समानः एव । अत्याग्रहेण यः वसति स एव दरिद्रः भवति । आत्यन्तिकतया सन्तोषः एव मनुष्यस्य सम्पन्नता भवति ।  मनसि सन्तुष्टे सति धनिकत्वं नाम न । दरिद्रता अपि न ।

**दशमः पाठः**

# शिक्षानुशासनम्

१. कति वेदाः सन्ति ?

चत्वारः।

२. कति वेदाङ्गानि सन्ति ?

षड् ।

३. वेदान्त इति प्रसिद्धं किम् ?

उपनिषद् ।

४. शिष्यानुशासनं कस्यां उपनिषदि अर्न्तभवति ?

तैत्तिरीयोपनिषदि ।

५. शिष्यानुशासनं तैत्तिरीयोपनिषदि कुत्र प्रतिपाद्यते ?

शिक्षावल्याम् ।

६ तैत्तिरीयोपनिषदि कति भागाः सन्ति ?

त्रयः ।(शिक्षावल्लि, ब्रह्मानन्दवल्लि,भृगुवल्लि)

७. तैत्तिरीयोपनिषद् कस्मिन् वेदे अन्तर्भवति ? कृष्णयजुर्वेदे ।

८ ममाध्ययनम् - मम + अध्ययनम् ।

९ वाक्यानीमानि -वाक्यानि + इमानि । २७

१० यान्यनवद्यानि - यानि + अनवद्यानि ।

११ यान्यस्माकं यानि + अस्माकम्

१२ शुभास्ते - शुभाः + ते ।

१३ मया किं .............।(करवाणी/करणीयम्) करणीयम् ।

१४ अश्रद्धयाऽदेयम् अश्रद्धया + अदेयम् ।

| **ध्येयवाक्यानि** | | **संस्थाः** |
|---|---|---|
| एल् ऐ सि | - | योगक्षेमं वहाम्यहम् । |
| कालिक्कट् सर्वकलाशाला | - | निर्माय कर्मणा श्रीः । |
| भारतीय जलसेना | - | शं नो वरुणः |
| भारतसर्वकारः | - | सत्यमेव जयते । |

| | | |
|---|---|---|
| केरलारक्षकदलः | - | मृदुः भावे दृढः कृत्ये ।. |
| शङ्कराचार्य संस्कृत सर्वकलाशाला | - | ज्ञानादेव तु कैवल्यम्। |

**वेदाः- वेदाङ्गानि – उपनिषदः पट्टिकारूपेण लिखतु ।**

ऋक्, प्रश्नम्, साम, शिक्षा, कल्पम्, कठम्, व्याकरणम्, बृहदारण्यकम् निरुक्तम्, ज्योतिषम्, ईशम्, अथर्वः, केनम्, मुण्डकम्, माण्डूक्यम्, यजुः, तैत्तिरीयम्, छन्दः, ऐतरेयम्, छान्दोग्यम् ।

| वेदाः | वेदाङ्कानि | उपनिषद् |
|---|---|---|
| | | |

वाक्यानि परिवर्त्य लिखतु।

**भवान् सत्यं वदतु।**

**त्वं सत्यं वद ।**

१. भवान् कार्यं वदतु।
   त्वं कार्यं ............

२. भवान् चर्चां नयतु।
   त्वं चर्चां ............

३. भवान् जलं पिबतु।
   त्वं जलं ...........

४. भवान् सम्यक् पठतु।
   त्वं सम्यक् .............

५. भवान् भोजनं खादतु।
   त्वं भोजनं ..............